Reg. No. : ....................................

Name : .......................................

**SY 18**

**MARCH 2019**

Time : 2½ Hours
Cool-off time : 15 Minutes

Part – III

## SANSKRIT SAHITYA

Maximum : 80 Scores

***General Instructions to Candidates :***

- There is a 'cool-off time' of 15 minutes in addition to the writing time of 2½ hrs.
- You are not allowed to write your answers nor to discuss anything with others during the 'cool-off time'.
- Use the 'cool-off time' to get Familiar with questions and to plan your answers.
- Read questions carefully before answering.
- All questions are compulsory and only internal choice is allowed.
- When you select a question, all the sub-questions must be answered from the same question itself.
- Electronic devices except non-programmable calculators are not allowed in the Examination Hall.

**निर्देशा** :

1. **सर्वे** प्रश्ना: समाधेयाः ।
2. प्रश्नान् प्रश्ननिर्देशान् च सावधानं पठित्वा उत्तरं लिखत ।
3. प्रश्नानां वाचनाय 15 निमेषा: अधिकतया काल्पिता: ।

**1.** **कोष्ठकात् समुचितम् उत्तरं लिखत ।** **(5 × 1 = 5)**

(क) नारायणीयस्य कर्ता कः ?

(नारायणभट्टपादः, कालिदासः, भारविः)

(ख) गद्यपद्यमयं काव्यं ________ भवति ।

(गद्यकाव्यम्, सन्देशकाव्यम्, चम्पूकाव्यम्)

(ग) लक्ष्मीपदलाञ्छनः कः ?

(माघः, भारविः, श्रीहर्षः)

(घ) स्वातन्त्र्यसमरचरितम् उपजीव्य लिखितं महाकाव्यं किम् ?

(नवभारतम्, विश्वभानुः, केरलोदयम्)

(ङ) नोबल् पुरस्कारेण सम्मानितः टागोर-महाशयस्य काव्यं किम् ?

(गीतागोविन्दम्, गीताञ्जलिः भजगोविन्दम्)

**2.** **पेटिकायाः समुचितम् उत्तरं निर्धार्य लिखत ।** **(3 × 1 = 3)**

| |
|---|
| रघुवंशम्, चन्द्रापीडः, आनन्दवर्धनः, भरतः |

(क) रघूणाम् चरितम् उपवर्णितं महाकाव्यं किम् ?

(ख) कादम्बर्यां नायकः कः ?

(ग) ध्वनिसिद्धान्तस्य उपज्ञाता कः ?

**3.** **अधः प्रदत्तयोः एकस्य उत्तरं लिखत ।** **(1 × 8 = 8)**

(क) अधः प्रदत्ताः सूचनाः स्वीकृत्य उपन्यस्यत ।

**सूचना :–**

- भरतस्य रसपद्धतिः ।
- भामहस्य अलङ्कारपद्धतिः ।
- वामनाचार्यस्य रीतिपद्धतिः ।
- रीतिरात्मा काव्यस्य ।

(ख) दानमेव महीयते इति पाठभागं आधारीकृत्य दानस्य महत्त्वं स्ववाक्यैः लिखत ।

- धर्मदानेन शून्यः कोशः ।
- अतिथिसत्कारे उत्सुकः ।
- गुरुदक्षिणार्थम् आगतः कौत्सः ।
- कुबेरात् धनस्वीकारः ।

**4.** **गद्यक्रमं पूरयत ।** **(1 × 4 = 4)**

इत्थं द्विजेन द्विजराजकान्तिः

आवेदितो वेदविदाम् वरेण ।

एनोनिवृत्तेन्द्रियवृत्तिरेनं

जगाद भूयो जगदेकनाथः ।।

द्विजराजकान्तिः एनोनिवृत्तेन्द्रियवृत्तिः __________ वेदविदां वरेण __________ इत्थं __________ एनं __________ जगाद ।

**5. आस्वादनटीकां लिखत ।** **(1 × 5 = 5)**

उदयति विततोर्ध्वरश्मिरज्जा –

वहिमरुचौ हिमधाम्नि याति चास्तम् ।

वहति गिरिरयं विलम्बिघण्टा –

द्वयपरिवारितवारणेन्द्रलीलाम् ।।

**सूचना :**

- पदचारुता ।
- अलङ्कारचारुता ।
- आशयः ।

**6. प्रदत्तं पद्यभागं पठित्वा प्रश्नानाम् उत्तराणि लिखत ।** **(1 × 5 = 5)**

समानशीलापि तदीयवल्लभा

तथैव नो चित्रजयं समेयुषी ।

कदाचिदूचे बत वृत्तिलब्धये

रमापतिः किं न सखा निषेव्यते ।।

(क) कुचेलस्य भार्या कीदृशी ?

(ख) रमापतिः कः ?

(ग) रेखाङ्कितपदं विश्लेषयत ।

**7. कथास्तम्भं क्रमीकुरुत ।** **(6 × 1 = 6)**

- अक्षमालां गृहीत्वा कण्ठाभरणताम् अकरोत् ।
- पुण्डरीकसंभवतया पुण्डरीक इति नाम चक्रे ।
- महाश्वेता अम्बया समम् अच्छोदं सरः स्नानार्थम् आगता ।
- अशेषजनपूजनीया चेयं जातिः इति निश्चित्य प्रणामम् अकरोत् ।
- अतिमनोहरं सवयसा स्नानार्थमागतं मुनिकुमारकम् अपश्यत् ।
- पारिजातकुसुममञ्जरी नन्दनवनदेवतया कर्णपूरीकृता ।

**8. अधः प्रदत्तयोः एकस्य उत्तरं लिखत ।** **(1 × 5 = 5)**

(क) लघुटिप्पणीं लिखत ।

मृच्छकटिकम् ।

**सूचना :**

- ग्रन्थकर्ता शूद्रकः ।
- नायकः चारुदत्तः ।
- मृदा निर्मितं शकटं मृच्छकटिकम् ।

(ख) नवभारतम् ।

**सूचना :**

- मुतुकुलं श्रीधरः ।
- महाकाव्यम् ।
- भारतीयानां दुरवस्था ।

**9. श्लोकस्य आशयं लिखत ।** **(1 × 5 = 5)**

सुखानि दुःखान्यपि लघु सोढुं
शक्तिं मम देहि ।
प्रणयं सफलयितुं परिचरणे
शक्तिं मम देहि ।।

**10. अधः प्रदत्तयोः एकस्य उत्तरं लिखत ।** **(1 × 4 = 4)**

(क) प्रदत्तं गद्यभागं प्रादेशिकभाषायां लिखत ।

श्वेतकेतुः गुरोः निर्देशानुसारम् अजद्वयं स्वीकृत्य वनम् अगच्छत् । तयोः पोषणे परिपालने सः अनभिज्ञोऽपि तदर्थं परिश्रमं कृतवान् । एकदा सः शृगालदर्शनेन बहु खिन्नः अभवत् । अजानां अजपोतानां च क्रीडासु आनन्दयुक्तः संजातः ।

(ख) प्रदत्तं श्लोकांशं आशयेन सह योजयत ।

**श्लोकांशाः**

(क) यत्र प्रसरति परितो ज्ञानं परमं स्वातन्त्र्यम् विदधानम् ।

(ख) यत्र प्रादुःषन्ति च वाचः परमार्थस्यागाधगुहातः ।

(ग) स्वातन्त्र्यस्य स्वर्गे तस्मिन् प्रतिबुध्येत पितर्मम राष्ट्रम् ।

(घ) प्रहर प्रहर निदाने मम हृदि दारिद्र्यस्येति ।

**आशयाः**

(क) मनसः स्वातन्त्र्यं विज्ञानस्य प्रसरः च वर्तते ।

(ख) दारिद्र्यस्य मूलकारणे प्रहर्तुम् प्रार्थयामि ।

(ग) परमसत्यस्य अगाधगह्वरात् स्वतन्त्रचिन्ता जायते ।

(घ) स्वातन्त्र्यचिन्तायां मे राष्ट्रं जागर्तुम् शक्तं कुरु ।

**11. रिक्तस्थानानि पूरयत ।** **(:**

(क) इति + उच्चैः = ________ ।

(ख) ततः + ________ = ततश्च ।

(ग) ________ + अहम् = नाहम् ।

**12. प्रदत्तेषु इष्टतमं गीतं किम् इति सयुक्तिकं प्रतिपादयत ।** **(1 × 5 = 5)**

(क) यत्र विनिर्भयमुदयति हृदयं

यत्रोदात्तो मूर्धोदेति ।

यत्र प्रसरति परितो ज्ञानं

परमं स्वातन्त्र्यं विदधानम् ।।

(ख) यान्यल्पान्यपि कार्याण्यनुदिनमापतितान्येषाम् ।

उपरि मनश्च समुन्नमयितुं शक्तिं मम देहि ।

**13. प्रदत्तेषु द्वयोः सन्दर्भं स्पष्टीकुरुत ।** **(2 × 4 = 8)**

(क) वृद्धिमापुरतुलां सितगात्राः ।

(ख) कीर्तिरिव मनुजेष्वभिकाम्या ।

(ग) मूर्तिमत्वमथवा किमु गर्ह्यम् ।

**14. प्रदत्तं गद्यभागं संगृह्य स्ववाक्यैः लिखत ।** **(1 × 4 = 4)**

श्वेतकेतुः गुरुकुले वर्षाणि उषित्वा सकलविद्याः जग्राह । ततः गुरुदक्षिणां दत्वा स्वभवनं प्रतिन्यवर्तत । बहुकालानन्तरं पुत्रं दृष्ट्वा पिता उद्दालकः आह्लादचित्तः अभवत् । दूरादागतं पुत्रम् अभिनन्दितुम् आबहिस्तोरणं जगाम च ।

**15. अधः प्रदत्तयोः एकस्य उत्तरं लिखत ।** **(3 × 1 = 3)**

(क) अधोलिखितात् वाक्यात् क्त्वान्त–ल्यबन्त–तुमुन्नन्तानि चित्वा लिखत ।

ब्राह्मणः गन्तुम् उत्सुकः भूत्वा कठोरभाषणं समाप्य श्रीकृष्णस्य समीपं गच्छति ।

(ख) एकं पदं लिखत

(क) दीपस्य दर्शनम् ।

(ख) जगदाम् एकनाथः ।

(ग) तपः एव धनं यस्य ।

**16. शुद्धं वाक्यद्वयं लिखत ।** **(2 × 1 = 2)**

(क) भक्तप्रियः श्रीकृष्णः द्वारकानाथः आसीत् ।

(ख) कृष्णः भक्तानाम् अभिलाषपूरणे समर्थः भवति ।

(ग) कुचेलः रत्नमये गृहे वसन्नपि भक्तिमान् एव भवतः ।

**17. यथोचितं योजयत ।** **(5 × 1 = 5)**

| **क** | | **ख** |
|---|---|---|
| (क) मृच्छकटिकम् । | – | कालिदासः । |
| (ख) मैत्रेयः । | – | नायकः । |
| (ग) चारुदत्तः । | – | कालिदासः । |
| (घ) रसपद्धतिः | – | शूद्रकः । |
| (ङ) कविकुलगुरुः । | – | विदूषकः । |